# .. durgAstavam from Mahabharata ..

## ॥ दुर्गास्तवम् महाभरतान्तर्गतम् ॥

नमस्ते सिद्धसेनानि आर्ये मन्दरवासिनि ।
कुमारि कालि कापालि कपिले कृष्ण-पिंगले ॥ १॥
भद्रकालि नमस्तुभ्यम् महाकालि नमोस्तुते ।
चंडिचंडे नमस्तुभ्यम् तारिणि वरवर्णिनि ॥ २॥
कात्यायनि महाभागे करालि विजये जये ।
शिखिपिच्छ-ध्वज-धरे नाना-भरण-भूषिते ॥ ३॥
अट्टशूल-प्रहरणे खड्गखेटधारिणि ।
गोपेन्द्रस्यानुजे ज्येष्टे नन्दगोप-कुलोद्भवे ॥ ४॥
महिषासृक्प्रिये नित्यं कौशिकि पीतवासिनि ।
अट्टहासे कोकमुखे नमस्तेऽस्तु रणप्रिये ॥ ५॥
उमे शाकम्बरी श्वेते कृष्णे कैटभनाशिनि ।
हिरण्याक्षि विरूपाक्षि सुधूम्राक्षि नमोऽस्तु ते ॥ ६॥
वेदश्रुति महापुण्ये ब्रह्मण्ये जातवेदसि ।
जम्बूकटकचैत्येषु नित्यम् सन्निहितालये ॥ ७॥
त्वं ब्रह्म-विद्या-विद्यानां महानिद्रा च देहिनाम् ।
स्कन्दमातर्भगवति दुर्गे कान्तारवासिनि ॥ ८॥
स्वाहाकारः स्वधा चैव कला काष्ठा सरस्वती ।
सावित्री वेदमाता च तथा वेदान्त उच्यते ॥ ९॥
स्तुतासि त्वं महादेवि विशुद्धेनान्तरात्मना ।
जयो भवतु मे नित्यं त्वत्प्रसादाद्रणाजिरे ॥ १०॥
कान्तारभयदुर्गेषु भक्तानां चालयेषु च ।
नित्यं वससि पाताले युद्धे जयसि दानवान् ॥ ११॥
त्वं जम्भनी मोहिनी च माया ह्रीः श्रीस्तथैव च ।
संध्या प्रभावती चैव सावित्री जननी तथा ॥ १२॥
तुष्टिः पुष्टिर्धृतिर्दीप्तिश्चन्द्रादित्य-विवर्धिनी ।
भूतिर्भूतिमतां संख्ये वीक्ष्यसे सिद्धचारणैः ॥ १३॥

This stotram is found in many
recensions of the mahAbharatam, in the virATa parvam, but has not been included in the critical edition prepared by the BORI. Jan Gonda says there are many versions of this stavam (Refer, J.Gonda, "Medieval Religious Literature in Sanskrit," A History of Indian Literature, Vol II, Fasc. 1, Otto

Harrasowitz.Wiesbaden, 1977). This version is found in the southern recension of the mahAbhAratam. It was recited by arjuna on the order of bhagavAn kRiShNa, in order to secure victory in the great battle. The stotram is credited with the power of bestowing destruction of enemies and a long healthy life in the phalashruti. It is traditionally held that the stotram also bestows self-control, which is essential for Atma-GYana.

---

Encoded and proofread by Ramakrishnan Balasubramanian and reproofread by N. Balasubramanian bbalu@sify.com .

---

Please send corrections to sanskrit@cheerful.com
Last updated January 23, 2011
http://sanskritdocuments.org